सहायक प्राध्यापक  ए० एस० कॉलेज बिक्रमगंज
सुकेश्वर सिंह

विषय — संस्कृत
कक्षा — B.A part-I (HONOURS)
paper — II
रामायणम्

प्रश्न — रामायणस्य रचनाकालः स्थिरी क्रियताम्।

उत्तरम् — विद्वांसः रामायणस्य रचना कालं निम्नांकित प्रकारेण स्थिरीकुर्वन्ति —

(1) मगधनरेशो ऽजातशत्रुः (500 B.C) पाटलिपुत्रस्य स्थापनां कृतवान। अनेनैव राज्ञा शत्रोराक्रमणात् रक्षार्थं गंगा शोणयोः संगमस्थले दुर्गमेकं निर्मापितवान। रामायणे गंगा शोणयोः संगमात् श्री राम गमनं वर्णितमस्ति किन्तु दुर्गस्य उल्लेखं नास्ति। अतः रामायणस्य रचना 500 B.C. प्रागेव सिद्ध्यति।

(2) रामायणे कौशल नरेशस्य सर्व राजधानी 'अयोध्या' इति वर्णित अस्ति। परन्तु बौद्ध-जैनग्रन्थेषु नगरमिदं साकेत नाम्ना प्रसिद्धं दृश्यते। रामपुत्रो लवः स्वराजधानीं श्रावस्त्यां स्थापितवान। बुद्धस्य समये कौशल नरेशः श्रावस्त्यामेव राज्यं करोति स्म। अतः रामायणस्य रचना बुद्धात प्रागेव भवितुम् अर्हति।

(3) रामायणे दक्षिणभारतस्य बहुतर-प्रदेश-भूभागं अरण्यरूपेण वर्णितमस्ति। यत्र वानर-जाति विशेषाः निवसन्ति स्म। अतः तत्र आर्यसभ्यतायाः विकासात् प्रागेव रामायणस्य रचनाजाता इति सिद्ध्यति।

(4) रामायणे विशाला मिथिला-चेति द्वे राज्ये वर्णिते स्तः। बुद्धस्य समये इमे द्वे नगर्यौ वैशाली-राज्यान्तर्गतमेव वर्णिते, अनेनैव प्रमाणेन रामायणं बुद्धात्प्राचीनम् सिद्ध्यति।

एतेषां ग्रन्थानां साक्ष्याणां च पर्यालोचनेन रामायणस्य रचना बुद्धस्य प्रादुर्भावात् प्रागेव सिद्ध्यति। अतः रामायणस्य रचनाकालः 500 B.C प्रागेव स्वीकर्तव्यः इति समीचीनं प्रतिभाति।

सहायक प्राध्यापक    ए० एस० कॉलेज विक्रमगंज
सुकेश्वर सिंह    विषय – संस्कृत
कक्षा – B.A. part – I (HONOURS)
Paper – I

मेघदूतम् – मङ्गलाचरणम्

कश्चित्कान्ताविरहगुरुणा स्वाधिकारात्प्रमत्तः
शापेनास्तङ्गमितमहिमा वर्षभोग्येण भर्तुः ।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ॥

अर्थ – कोई यक्ष था। वह अपने काम में असावधान हुआ तो यक्षपति ने उसे शाप दिया कि वर्ष भर पत्नी का भारी-विरह सहो। इससे उसकी महिमा ढल गयी।

उसने रामगिरि के आश्रमों में में बस्ती बनाई जहाँ घने छायादार पेड़ थे और जहाँ सीताजी के स्नानों द्वारा पवित्र हुए जल कुण्ड भरे थे।

सहायक प्राध्यापक
सुकेश्वर सिंह

ए० एस० कॉलेज किशनगंज
विषय — संस्कृत
कक्षा — B.A. part — I
Paper — I

कुमार संभवम् (अर्थ सहित व्याख्या)

कदाचिदासन्नसखी मुखेन सा मनोरथज्ञं पितरं मनस्विनी।
अयाचतारण्यनिवासमात्मनः फलोदयान्ताय तपः समाधये॥

अन्वय — कदाचित् मनस्विनी सा मनोरथज्ञं पितरं आसन्नसखीमुखे फलोदयान्ताय तपः समाधये आत्मनः अरण्यनिवासम् अयाचत।

शब्दार्थ: — कदाचित = किसी समय, मनस्विनी = दृढ़ निश्चयवाली सा = वह, पार्वती = उमा ने, मनोरथज्ञम् = मनोरथ को जानने वाले, पितरम = पिता हिमालय को, आसन्नसखीमुखेन = समीप रहनेवाली सखी के माध्यम से, फलोदयान्ताय = फलोत्पत्ति पर्यन्त, तपः समाधये = तपश्चरण के लिये, आत्मनः = अपने, अरण्य निवासम् = वनवास को अयाचत = माँगा।

सरलार्थ:— अनन्तरमेकस्मिन दिवसे स्थिरनिश्चया सा पार्वती अभिलाष-विदं जनकं कन्यकोचितं भावं प्रदर्शयती स्वाप्तसखीमुखेन फलप्राप्तीपर्यन्तं तपश्चरणार्थं स्वस्यारण्यवासमयाचत।

हिन्दी — अनन्तर किसी दिन दृढ़ निश्चयवाली पार्वती ने सदा निकट रहनेवाली अपनी सखी के द्वारा उसके मनोरथ को जानने वाले पिता हिमालय से प्रयोजन की सिद्धि होने तक तप करने के लिए वनवास की आज्ञा माँगी।

विशेष — कवि ने 'मनस्विनी' शब्द का 'स्वाभिमानिनी' अर्थ भी अन्यत्र किया है। "मनस्विनी मानविघातदक्षम्"